श्री शिवताण्डवस्तोत्रम्

Shri Shiva Tandava Stotram

Source: Internet Archive — Shiv Bhakt Mal, uttarardh, Gorakhpur first edition (January 1931), Mumukshu Bhawan scan, CC0 (Shiva Tandava Stotram verses 1–14 on scan leaves 28–29, printed pages 178–179). Also compared: Wikimedia Commons — Brihat Stotra Ratnakara 1912 public-domain scan, stable file revision (item 45 on scan pages 120–122, printed pages 112–114; read from the Internet Archive copy of the same scan); Creative Commons CC0 1.0 — scan release (1931 print); Sanskrit Wikisource contributors — Shiva Tandava Stotram revision 400547 (CC BY-SA); Creative Commons Attribution-ShareAlike 4.0 license; Sanskrit Documents — Shiva Tandava Stotram (research comparison only).

VERSE 1

जटाटवीगलज्जलप्रवाहपावितस्थले।
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम्।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं।
चकार चण्डताण्डवं तनोतु नः शिवः शिवम्॥१॥

Jatatavi-galaj-jala-pravaha-pavita-sthale |
Gale avalambya lambitam bhujanga-tunga-malikam |
Damad-damad-damad-daman-ninada-vad-damarvayam |
Chakara chanda-tandavam tanotu nah Shivah shivam ||1||

VERSE 2

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी।
विलोलवीचिवल्लरीविराजमानमूर्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके।
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम॥२॥

Jata-kataha-sambhrama-bhraman-nilimpa-nirjhari |
Vilola-vichi-vallari-virajamana-murdhani |
Dhagad-dhagad-dhagaj-jvalal-lalata-patta-pavake |
Kishora-chandra-shekhare ratih pratikshanam mama ||2||

VERSE 3

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर।
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि।
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि॥३॥

Dharadharendra-nandini-vilasa-bandhu-bandhura |
Sphurad-diganta-santati-pramodamana-manase |
Kripa-kataksha-dhorani-niruddha-durdharapadi |
Kvachid-digambare mano vinodametu vastuni ||3||

VERSE 4

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा।
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे।
मनोविनोदमद्भुतं बिभर्तु भूतभर्तरि॥४॥

Jata-bhujanga-pingala-sphurat-phana-mani-prabha |
Kadamba-kunkuma-drava-pralipta-dig-vadhu-mukhe |
Madandha-sindhura-sphurat-tvag-uttariya-medure |
Mano-vinodam-adbhutam bibhartu bhuta-bhartari ||4||

VERSE 5

सहस्रलोचनप्रभृत्यशेषलेखशेखर।
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः।
भुजङ्गराजमालया निबद्धजाटजूटकः।
श्रियै चिराय जायतां चकोरबन्धुशेखरः॥५॥

Sahasra-lochana-prabhrity-ashesha-lekha-shekhara |
Prasuna-dhuli-dhorani vidhusar-anghri-pitha-bhuh |
Bhujanga-raja-malaya nibaddha-jata-jutakah |
Shriyai chiraya jayatam chakora-bandhu-shekharah ||5||

VERSE 6

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा।
निपीतपञ्चसायकं नमन्निलिम्पनायकम्।
सुधामयूखलेखया विराजमानशेखरं।
महाकपालिसम्पदे शिरोजटालमस्तु नः॥६॥

Lalata-chatvara-jvalad-dhananjaya-sphulinga-bha |
Nipita-pancha-sayakam naman-nilimpa-nayakam |
Sudha-mayukha-lekhaya virajamana-shekharam |
Mahakapali-sampade shiro-jatalam astu nah ||6||

VERSE 7

करालभालपट्टिकाधगद्धगद्धगज्ज्वल।
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक।
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम॥७॥

Karala-bhala-pattika-dhagad-dhagad-dhagaj-jvala |
Dhananjayahuti-krita-prachanda-pancha-sayake |
Dharadharendra-nandini-kuchagra-chitra-patraka |
Prakalpanaika-shilpini trilochane ratir mama ||7||

VERSE 8

नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्।
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः।
कलानिधानबन्धुरः श्रियं जगद्धुरंधरः॥८॥

Navina-megha-mandali niruddha-durdhara-sphurat |
Kuhu-nishithini-tamah prabandha-baddha-kandharah |
Nilimpa-nirjhari-dharas tanotu kritti-sindhurah |
Kala-nidhana-bandhurah shriyam jagad-dhurandharah ||8||

VERSE 9

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा।
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम्।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं।
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे॥९॥

Praphulla-nila-pankaja-prapancha-kalima-prabha |
Valambi-kantha-kandali-ruchi-prabaddha-kandharam |
Smarachchidam purachchidam bhavachchidam makhachchidam |
Gajachchidandhakachchidam tam antakachchidam bhaje ||9||

VERSE 10

अखर्वसर्वमङ्गला कलाकदम्बमञ्जरी।
रसप्रवाहमाधुरी विजृम्भणामधुव्रतम्।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं।
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे॥१०॥

Akharva-sarva-mangala-kala-kadamba-manjari |
Rasa-pravaha-madhuri-vijrimbhana-madhu-vratam |
Smarantakam purantakam bhavantakam makhantakam |
Gajantakandhakantakam tam antakantakam bhaje ||10||

VERSE 11

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वसद्।
विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट्।
धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः॥११॥

Jayatvad-abhra-vibhrama-bhramad-bhujangama-shvasad |
Vinirgamat-krama-sphurat-karala-bhala-havyavat |
Dhimid-dhimid-dhimi-dhvanan-mridanga-tunga-mangala |
Dhvani-krama-pravartita-prachanda-tandavah Shivah ||11||

VERSE 12

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्।
गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः।
समं प्रवृत्तिकः कदा सदाशिवं भजाम्यहम्॥१२॥

Drishad-vichitra-talpayor bhujanga-mauktika-srajor |
Garishtha-ratna-loshthayoh suhrid-vipaksha-pakshayoh |
Trinaravinda-chakshushoh praja-mahi-mahendrayoh |
Samam pravrittikah kada Sadashivam bhajamy aham ||12||

VERSE 13

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्।
विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन्।
विमुक्तलोललोचनो ललामभाललग्नकः।
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम्॥१३॥

Kada nilimpa-nirjhari-nikunja-kotare vasan |
Vimukta-durmatih sada shirah-stham anjalim vahan |
Vimukta-lola-lochano lalama-bhala-lagnakah |
Shiveti mantram uchcharan kada sukhi bhavamy aham ||13||

VERSE 14

निलिम्पनाथनागरीकदम्बमौलिमल्लिका-
निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरः।
तनोतु नो मनोमुदं विनोदिनीमहर्निशं।
परिश्रयं परं पदं तदङ्गजत्विषां चयः॥१४॥

Nilimpa-natha-nagari-kadamba-mauli-mallika |
Nigumpha-nirbhara-ksharan-madhushnika-manoharah |
Tanotu no mano-mudam vinodinim aharnisham |
Parishrayam param padam tad-anga-jatvisham chayah ||14||

VERSE 15

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं।
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम्।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं।
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम्॥१५॥

Imam hi nityam evam uktam uttamottamam stavam |
Pathan smaran bruvan naro vishuddhim eti santatam |
Hare gurau subhaktim ashu yati nanyatha gatim |
Vimohanam hi dehinam Sushankarasya chintanam ||15||

VERSE 16

पूजावसानसमये दशवक्त्रगीतं।
यः शम्भुपूजनमिदं पठति प्रदोषे।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां।
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः॥१६॥

Pujavasana-samaye dashavaktra-gitam |
Yah Shambhu-pujanam idam pathati pradoshe |
Tasya sthiram ratha-gajendra-turanga-yuktam |
Lakshmim sadaiva sumukhim pradadati Shambhuh ||16||